नं० ४३५६ - घ

मीमांसाप्रवेशिका

नं० ५२५६ - घ

पत्राणि ४

हेत्वाप्यवज्रमदपत्तुदितादिः एवं निखिलवेदस्य साक्षात्परंपरया यागादिधर्मबोधकत्वं सिद्धं
सर्वधर्मः सकामः संसारसूत्रहेतुः निष्कामो मोक्षसुखव्यंजकः गोपालरामकृतिना बालो
पकृतये कृता प्रवेशिका श्रीमीमांसासौधराजस्य राराजताम् इति मीमांसाप्रवेशिका ॥

वेदैकदेशविधिवाचकचोदनापदरात्तो वेदो विधिमन्त्रनामधेया[र्थ]वादनिषेधात्मकः = ४

प्रवर्तनाऽऽज्ञोपदेशश्च कार्यं चोदना विधिः = १
चोदनाचोपदेशश्च विधिश्चैकार्थवाचकाः = २

ॐ श्रीगणेशाय नमः। जैमिनीयमते सौधे प्रवेष्टुं यस्य धीर्भवेत्। तत्प्रवेशाय मया द्वारमत्रोद्घाट्यते
मनाक्॥१॥ जैमिनिसूत्रेषु प्रथमं सूत्रम् अथातो धर्मजिज्ञासा। अथ वेदाध्ययनानन्तरम्। यतो वे
दाध्ययनमर्थज्ञानरूपदृष्टार्थकमतो धर्मस्य वेदार्थस्य ज्ञानाय विचारः कर्तव्यः। चोदनालक्षणोऽ
मीमां॰ प्रवे॰ र्थो धर्मः। वेदबोध्यः फलवानर्थो धर्मः। भोजनफलानर्थजनकश्येनादिवारणाय कैमोतपदंत्रयम् इष्टं स्वर्गादि...
१ यजेतेत्यादौ लिङादशब्दालकारसाधारणेनाख्यातत्वांशेन पुरुषनिष्ठा यागादिप्रवृत्तिरूपार्थी
भावना लिङंशेन पुंप्रवृत्तिजनिका लिङादिशब्दनिष्ठा प्रवर्तना चोदनाऽऽज्ञा विधिसंज्ञिका शाब्दी
भावना चोच्यते। भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषो भावना। भवितुः स्वर्गादेर्भवनमुत्प उत्पद्यमानस्य
त्तिस्तदनुकूलो भावयितुरुत्पादयितुः पुरुषस्य यागादिप्रवृत्तिरूपो व्यापारविशेष आर्थी भावना॥१॥
भवितुः पुंप्रवृत्तिरूपप्रयत्नस्य भवनानुकूलो लिङादिशब्दस्य प्रवर्तनारूपो व्यापारविशेषः शाब्दी
भावना। सा च भावना किं भावयेत् केन भावयेत् कथं भावयेदिति साध्यसाधनेतिकर्तव्यतांशत्रयवती॥१॥
क॰ स्वर्गादिभाव्यकयागकरणप्रयाजादीतिकर्तव्यताकपुरुषप्रवृत्तिस्वरूपार्थभावनाभाव्यकलिङा
दिज्ञानकरणकप्राशस्त्यज्ञानेतिकर्तव्यताकलिङादिशब्दनिष्ठप्रवर्तनालक्षणा भावनेति स्वर्ग
कामो यजेतेति वाक्यार्थबोधः। विधिमन्त्रनामधेयनिषेधार्थवादात्मकमपौरुषेयं वाक्यं वेदः॥१॥

अग्निहोत्रहोमेन स्वर्गं भावयेत् =

मानान्तरेण =

तत्राज्ञातज्ञापको वेदभागो विधिः यथाग्निहोत्रं जुहुयात्स्वर्गकाम इति विधिः प्रत्यक्षादिप्रमाणेन वा
क्यान्तरेण चाप्राप्तं स्वर्गफलकं होमं विधत्ते दध्ना जुहोतीत्यत्र अग्निहोत्रं जुहोतीत्यनेन प्राप्तहोमोद्देशे
दध्ना होमं भावयेत् = न दधिमात्रगुणविधानम् सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधिः उत्प सोमवता यागेनेष्टं भावयेत् =
विधि त्तिविनियोगप्रयोगाधिकारविभेदाच्चतुर्विधो विधिः तत्र कर्मस्वरूपबोधको विधिरुत्पत्तिविधिः य
थाग्निहोत्रं जुहोतीति अङ्गप्रधानसंबन्धबोधको विधिर्विनियोगविधिः यथा दध्ना जुहोतीति श्रुति
लिङ्गवाक्यप्रकरणस्थानसमाख्यारूपप्रमाणषट्कसहकृतेनानेन विधिना परार्थत्वरूपमङ्गत्वं बोध्य
स्वार्थवक्तृपदान्तरानपेक्षं पदं श्रुतिः = ते तत्र निरपेक्षो रवः श्रुतिः सा त्रिधा अप्रवृत्तप्रवर्तिका विधात्री अभिधेयार्थोपस्थापिका अभिधा लिङ्गाद्यात्मिका =
व्रीह्यादिश्रुतिः ६ = त्री अङ्गि[illegible]संबन्धबोधिका विनियोक्त्री सापि त्रिधा विभक्तिरूपा एकाभिधानरूपा ए यस्याः श्रवणादेवाङ्गसंबन्धप्रतीतिः सा वि योक्त्री =
कपदरूपा व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वं व्रीहीन्प्रोक्षतीति द्वितीया
याश्रुत्या व्रीह्यङ्गत्वं यजेतेत्याख्याताभिहितसंख्याया भावनाङ्गत्वं समानाभिधानश्रुतेरेव पदश्रुती आख्यातेन संख्यायाः अभिधानात्
संख्यायाः च कर्तृद्वारा यागाङ्गत्वं सेयं श्रुतिर्लिङ्गादिपञ्चभ्यः प्रबला तेषां पूर्वपूर्वसापेक्षत्वेन विनियोजकत्वा
त् लिङ्गादिषु न प्रत्यक्षो विनियोजकः शब्दोऽस्ति किंतु कल्प्यः अत एवैन्द्र्या ऋचो लिङ्गादिन्द्रोपस्था
नार्थत्वं किं त्वैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र द्वितीयाश्रुत्या गार्हपत्योपस्थानार्थत्वं सामर्थ्य

अभिधानुपदेशमित्यनपेक्षो रवः श्रुतिः सर्वभावगतानामाहितिर्लिङ्गमित्यभिधीयते मुख्यत्वार्थ ... पदानां वाक्यमुच्यते
प्रधानवाक्यमङ्गानां वाक्यं प्रकरणं मतम् स्थानं समानदेशत्वं समाख्या यौगिको रवः इति श्लोकान्यादि ... मी
मांसाशास्त्रपारगैः ८ =

सादनाङ्गत्वं=२

श्रुतार्थावगताशक्तिर्लिङ्गम्= संहत्यार्थवदत्यदवृन्दं वाक्यम्=२ सन्निध्याम्नातपदार्थसंबंधायवदेतिकर्तव्यताकांक्षा ... प्रकरणम् इतिकर्तव्यताकांक्षावशेन सन्निहितकाव्यान्तरसंबंधः ...

तस्मिंस्त्वं सीद

लिङ्गम् बर्हिर्देवसदनं दामीति मंत्रस्य लिङ्गात्कुशलवनाङ्गत्वम् लिङ्गं वाक्यादिभ्यो बलवत् अत ए

वस्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामीति मन्त्रस्य सदनं कृणोमीति लिङ्गात्पुरोडाशसदन

मीमां० प्रवे० करणाङ्गत्वं न तु वाक्यात् समभिव्याहारो वाक्यम् साध्यत्वादिवाचकद्वितीयाद्यभावेऽपि शेषशेषिवाचक

२ पदयोः सहोच्चारणं समभिव्याहारः यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति पर्णताजु

ह्वोः समभिव्याहाराद्वे पर्णताया जुह्वङ्गत्वम् वाक्यं प्रकरणादिभ्यो बलवत् अत एवेन्द्राग्नी इदं हविरित्यादे

रेकवाक्यत्वाद्दर्शाङ्गत्वं न तु प्रकरणाद्दर्शपूर्णमासाङ्गत्वं उभयाकांक्षा प्रकरणम् यथा प्रयाजादिषु समि

धो यजतीत्यादिवाक्ये फलविशेषस्यानिर्देशात्समिद्यागेन भावयेदिति बोधानन्तरं किमित्युपकार्या२

कांक्षा दर्शपूर्णमासवाक्येऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेदिति बोधानन्तरं कथमित्युपकारकाका

प्रयाजादि= ङ्क्षा इत्येवं चोभयाकांक्षया प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम् प्रकरणं स्थानादेर्बलवत् अत एवाक्षै

र्दीव्यति राजन्यमिति देवनादयो धर्मा अभिषेचनीयसन्निधिपठिता अपि स्थानान्न तदङ्गं किं तु प्रकरणाद्रा

समानदेशत्वं स्थानम्= जसूयाङ्गमिति देशसामान्यं स्थानम् पाठसादेश्यमनुष्ठानसादेश्यं चेति पाठसादेश्यमपि द्विविधम्

यथासंख्यपाठः सन्निधिपाठश्चेति तत्रैन्द्राग्नमेकादशकपालं निर्वपेद्वैश्वानरं द्वादशकपालं निर्वपे

दित्येवं क्रमविहितेष्विष्टिषु इन्द्राग्नी रोचना दिव इत्यादीनां क्रमविहितानां मन्त्राणां कैमर्थ्याकांक्षायां प्रथमे

क्वचिद्यद्विहितये ... इतिकर्तव्यताकांक्षा वृप्रकरणमितिव्याक्रियते=६

दि

प्रधानवाक्यसंगतयाकांक्षा प्रकरणम् दर्शादि=

२

यत्र संग्रहो गोपदेशः साक्षात्कृतिः अन्यां विकृतिः प्रकृतौ गानुवा
देन विहितयोरंगयोर्मध्ये पतितं संदंशः प्रकृतिविकृत्योः कार्तव्या =

प्रथमं द्वितीयं तृतीयमिति क्रमेण विनियोगो यथासंख्यपाठात् । वैकृताङ्गानां प्राकृताङ्गानुवादेन वि
हितानां संदंशपतितानां विकृत्यर्थत्वं सन्निधिपाठात् । यथा सर्वेषां मानां औपवसथ्येऽह्न्यनुष्ठीयमानपश्व । चतुर्थवित् =
र्थत्वं तद्देशत्वपुरोडाशानां पशुधर्माणामनुष्ठानसादेश्यात् । स्थानं समाख्यातः प्रबलम् । अत एव शुन्धन
याज्ञ मन्त्रः सान्नाय्यपात्राङ्गं पाठसादेश्यात् । न तु पौरोडाशिकमिति समाख्यया पुरोडाशपात्राङ्गं । यौगिकः
शब्दः समाख्या । होतृचमसइति होतृचमसभक्षणाङ्गत्वं वैदिकसमाख्यया । अध्वर्युमिति तत्तत्पदा
र्थाङ्गत्वं लौकिकया ॥ कर्माङ्गद्रव्याद्युद्देशेन विधीयमानमवघातप्रोक्षणादि सन्निपत्योपकारकमङ्गं । क
र्मोद्देशेन हि विधीयमानं प्रयाजादिकमारादुपकारकम् । प्रयोगप्राशुभावबोधको विधिः प्रयोगवि । अङ्गानां नियतक्रमबोधकत्वात् =
धिः । तत्र षट् प्रमाणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि । क्रमपरवचनं श्रुतिः । वेदं कृत्वा वेदिं
वेदवेदिकरणयोर्व्यवधानेन प्राप्तत्वात् = करोतीति केवलक्रमपरं वषट्कर्तुः प्रथमभक्ष इति क्रमविशिष्टपदार्थपरं । आश्विनग्रहस्य पाठक्रमा
त्तृतीयस्थाने ग्रहणप्रसक्तावाश्विनो दशमो गृह्यत इति श्रुतेर्दशमस्थाने ग्रहणमिति श्रुतेरितरप्रमाणे । अर्थपाठादिभ्यः =
भ्यो बलवत्त्वम् । प्रयोजनवशेन क्रमनिर्णय आर्थक्रमः । अग्निहोत्रं जुहोति यवागूं पचतीत्यत्र यवागूपाक
स्याग्निहोत्रार्थत्वेन पाठक्रममबाधित्वा प्रथममनुष्ठानम् । पदार्थबोधकवाक्यानां क्रमः पाठक्रमः । तेन प
दार्थानां क्रमानुष्ठानम् । अनुष्ठानक्रमस्य स्मरणक्रमाधीनत्वात् क्रमस्य मन्त्रक्रमाधीनत्वादन्तरङ्गो । बलवान् =

कर्मविधायकवाक्यं ब्राह्मणवाक्यम् =

मीमां॰ प्रवे॰

साद्यस्का विकृतौ =

3

मन्त्रपाठो ब्राह्मणपाठात् प्रयाजानां समिधो यजति तनूनपातं यजतीत्येवं विधवाक्यक्रमाद्यः क्रमः स ब्रा
ह्मणपाठक्रमादेवान्यस्य क्रमस्मारकस्याभावात् स्थानं नामोपस्थितिः यस्मिन्हि देशेऽनुष्ठीयते तत्र पूर्व
तने पदार्थे कृते स एव प्रथममुपस्थितो भवतीति युक्तं तस्य प्रथममनुष्ठानं यथा ज्योतिष्टोमे भिन्नकाल
विहितानां विकृतौ साद्यस्के चोदकप्राप्तानामग्नीषोमीयसवनीयानुबन्ध्यानां पशुयागानां सह पशू
नालभत इति सहानुष्ठाने कर्तव्ये प्रकृतावाश्विनग्रहणं कृत्वा त्रिवृता यूपं परिवीय सवनीयः पशुमुपाक रज्वा = वेष्ट
रोतीत्याश्विनग्रहणानन्तरं विहितस्य सवनीयस्य साद्यस्के आश्विनग्रहणे कृते प्रथममुपस्थिते प्रथमम
नुष्ठानमितरयोः पश्चात् प्रधानक्रमेणाङ्गक्रमो मुख्यक्रमः प्रथमकर्तव्यस्याग्नेययागस्य हविरभि
घारणं प्रयाजशेषाज्येन प्रथमं कर्तव्यं पश्चात्कर्तुमैन्द्रयागस्य दध्यभिघारणं पश्चात्कर्तव्यं हविर्द्व । अङ्गयोः =
योः प्रधानक्रमेणाभिघारणे कृते प्रथमं हविषोऽग्नेययागे क्रियमाणे दध्यभिघारणेनान्तरं पश्चाद्द व्यवधानं
ऐन्द्रयागे क्रियमाणे आग्नेययागेनान्तरं प्रथमं दध्नः पश्चाद्धविष इत्युत्क्रमेणाभिघारे कृते तु
हविषः स्वप्रधानेनाग्नेयेन सहास्य नाम व्यवधानं दध्नः स्वप्रधानेनैन्द्रयागेन सह हविरभिघारणाग्ने
ययागाभ्यां द्वाभ्यां व्यवधानं मुख्यक्रमः पाठक्रमाद्दुर्बलः प्रवृत्तिक्रमाद्बलवान् प्रवृत्तिक्रमे ब
हूनामङ्गानां प्रधानविप्रकर्षात् सहप्रयुज्यमानेष्वङ्गिषु साङ्गानामनुष्ठाने कर्तव्ये द्वितीयाद्यंगा

आग्नेयैन्द्रयागयोः = ४

हविराग्नेययोरङ्गप्रधानयोः ५ =

मुख्यक्रमे तु सन्निकर्षः स्यात् = ५

३

प्रथमं हविषोऽभिघारणम् ततो दध्नः ततः आग्नेययागः ततः ऐन्द्रयागः = ५

दध्यैन्द्रयोरङ्गप्रधानयोः = ४

नां प्रयमानुष्ठितानामङ्गक्रमायः क्रमः स प्रवृत्तिक्रमः । प्रजापत्येषु सप्तदशपशुषु सह प्रयुज्यमानेषु कस्मा-
च्चित्पशोरारभ्य एकमुपाकरणमङ्गं सर्वेषु पशुषु कृत्वा नियोजनादि द्वितीयाद्यङ्गमपि तत एवारभ्य कर्त्त-
व्यम् । कर्मजन्यफलस्वाम्यबोधको विधिरधिकारविधिः । यद्विधिवाक्ये पुरुषविशेषणत्वेन श्रूयते सो-
ऽधिकारः । यथा काम्ये कर्मणि फलकामना । नैमित्तिके कर्मणि निमित्तनिश्चयः । नित्यसंध्योपा-
सनादौ शुचिर्विहितकालजीवित्वम् । तदेवं निरूपितश्चतुर्विधो विधिः । प्रयोगसमवेतार्थस्मारको
मन्त्रः । मन्त्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणान्न ब्राह्मणवाक्येन लौकिकवाक्येन वा पूर्वोनासाध-
नैयाप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः । यथा व्रीहीनवहन्तीत्यत्र वैतुष्यसा-
धनेन नखविदलनादिप्राप्तिपक्षेऽप्राप्तस्याऽवघातस्य प्रापकोऽवहन्तीति नियमविधिः । यथा यजेत स्व-
र्गकाम इति । उभयोर्युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्याविधिः । यथा पंच पंचनखा भक्ष्या
इति रागतः प्राप्तेः पंचनखाऽपंचनखभक्षणस्य युगपत्प्राप्त्याऽभक्षणा एवं नियमविधी । उद्भिदा यजेत प-
शुकाम इत्यत्रोद्भिच्छब्दो यागनामधेयं मत्वर्थलक्षणाभयात् । अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रं तत्प्र-
ख्यशास्त्रात् । श्येनेनाभिचरन्यजेतेत्यत्र श्येनो नाम तद्व्यपदेशात् । यथा वै श्येनो निपत्यादत्त एवमयं
द्विषन्तं भ्रातृव्यं निपत्यादत्त इति श्येनेनोपमानेन स्तुतिर्न विधेयस्य यागविशेषस्य [illegible]शाके ति श्येनो

प· ४ नं· ४३५६

यागनाम निवर्तकं वाक्यं निषेधः यथा न कलञ्जं भक्षयेदिति लिङ्समभिव्याहृतो नञ् लिङ्बोधित
स्यार्थस्य प्रवर्तनाया विरोधि निवर्तनां बोधयति नेक्षेतोद्यंतमादित्यमित्यत्र तु नञो धात्वर्थेनान्वयविरो
मीमां· प्रवे· धः नीक्षणसंकल्पे लक्षणात् तस्य कर्तव्यत्वसंभवात् तस्य व्रतमित्युपक्रमात् व्रतशब्दस्य कर्तव्यार्थे
४ रूढत्वात् नञो भावनान्वये कर्तव्यार्थानवबोधात् आदित्यविषयकानीक्षणसंकल्पेन पापक्षयं भाव
येदिति बोधः यजतिषु येयजामहं करोति नानुयाजेष्विति अत्र विकल्पभयेन पर्युदासाश्रयणात् अनुयाजव्यति
रिक्तेषु येयजामहं कुर्यादित्येव बोधो न त्वनुयाजेषु येयजामहं न कुर्यादिति प्रतिषेधः निषेधस्य
यजामहमित्यस्य यजतिषु येयजामहं करोतीति शास्त्रप्राप्तस्य प्रतिषेधे विकल्प एव स्यान्न तु बाधः
परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात् प्राशस्त्यनिंदापरं वाक्यमर्थवादः वायव्यं श्वेत
मालभेत भूतिकाम इत्यादिविधिशेषस्य वायुर्वै क्षेपिष्ठा देवतेत्यादेर्विधेयार्थप्राशस्त्यबोधकत
यार्थवत्वं विरोधे गुणवादः स्यादनुवादोऽवधारिते भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः
यथा प्रमाणान्तरविरोधेऽर्थवादो गुणवादः यथादित्यो यूप इत्यत्र यूपे आदित्याभेदस्य प्रत्यक्षविरोधा
दादित्यवदुज्ज्वलत्वगुणोऽनेन लक्षणया बोध्यते प्रमाणान्तरावगतार्थबोधकोऽनुवादः यथाऽ
ग्निर्हिमस्य भेषजमित्यादिः प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः यथेन्द्रो
बर्हिषि रजतं न देयमित्यादिनिषेधशेषस्य सोऽरोदीदित्यादेर्निषेध्यस्य निंदितत्वबोधकतयार्थवत्वं ४